॥ श्रीः ॥

# प्रश्नभूषणाभिधोऽयं ग्रन्थः


श्रीजीवनाथशर्म्मणा

विरचितः


श्रीकाशिकराजकीयपाठशालायां ज्योतिःशास्त्रप्रधानाध्यापक-
महामहोपाध्यायपण्डितवरसुधाकरद्विवेदिशिष्येण
श्रीशशिपालशर्म्मणा सम्यक् परिशोधितः ।


*BENARES:*

PRINTED AND PUBLISHED BY

**MESSRS. BRAJ B. DAS & CO.**

AT THE BENARES PRINTING PRESS

1893.



**Registered According to Act XXV. of 1867.**



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# सूचीपत्रम् ।



| | पृ० | पं० |
|---|---|---|
| मङ्गलाचरणम् ... ... ... | १ | १ |
| भावानां प्रयोजनम् ... ... ... | २ | ६ |
| कपटप्रश्नलक्षणम् ... ... ... | ३ | १५ |
| मौष्टिकादिप्रश्नः ... ... ... | ४ | ८ |
| पथिकागमनानागमनप्रश्नः ... ... | ४ | १६ |
| नौकागमनप्रश्नः ... ... ... | ६ | १६ |
| ऋतुगमनागमननिवृत्तिप्रश्नः ... ... | ७ | ११ |
| विवाहप्रश्नः ... ... ... | ८ | १२ |
| स्त्रीप्रश्नः ... ... ... | ९ | १ |
| गर्भप्रश्नः ... ... ... | ९ | २१ |
| प्रसवकालप्रश्नः ... ... ... | १० | ४ |
| रोगीमरणजीवनप्रश्नः ... ... ... | ११ | १२ |
| नष्टद्रव्यप्रश्नः ... ... ... | १३ | १ |
| वादिप्रतिवादिनोर्जयविजयप्रश्नः ... ... | १३ | १३ |
| दिनचर्याप्रश्नः ... ... ... | १४ | २ |
| प्रकारान्तरम् ... ... ... | १४ | ६ |
| क्रयविक्रयप्रश्नः ... ... ... | १४ | १२ |
| द्रेष्काणप्रश्नः ... ... ... | १५ | १७ |
| प्रश्नोपयोगिवस्तूनि ... ... ... | १७ | ५ |
| वराहमिहिरोक्तेष्टकालसाधनस्य ... ... ... | १८ | १६ |
| श्लोकस्तद्व्याख्या तदुदाहरणञ्च ... ... | | |
| कस्यचित्पद्यम् ... ... ... | २० | १२ |
| लग्नानयनोदाहरणम् ... ... ... | २० | १६ |
| द्वयमलग्नसाधनम् ... ... ... | २१ | ६ |
| अथराशाविष्टकालज्ञानार्थं कस्यचित्पद्यम् ... | २२ | १० |



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

# प्रश्नभूषणम् ।

श्रीगणेशाय नमः ॥

जगत्पद्मं भानावुदयमुपयाते क्षितितले
श्रिया सार्कं प्रीत्या विकसति समन्तादर(१)मिदम्
प्रवर्त्तन्ते यज्ञा दिवि दिविषदो यान्ति परमं
विनोदत्वं यस्मिन्स दिशतु पटुत्वं दिनमणिः ॥ १ ॥
निबन्धं प्रश्नतन्त्राणामधिगम्य पितुर्मुखः ॥
दैवज्ञानां विनोदाय क्रियते प्रश्नभूषणम् ॥ २ ॥
द्विविधगणितविद्यातत्वनैपुण्ययुक्तो
बहुविधविषयानां चातुरीणां धुरीणः(२) ॥
गुरुचरणसरोजध्यानयोगानुरक्तो
भवति यदि तदाऽसौ प्रश्नविद्याप्रवीणः ॥ ३ ॥
शान्तो विवेकी शुद्धात्मा हिरण्यमणिसत्फलैः ॥
दैवज्ञं प्रेमभावेन सम्पूज्यार्थं निवेदयेत् ॥ ४ ॥
तनुकोशसहोदरबन्धुसुता
रिपुकामविनाशशुभा विबुधैः ॥
पितृभं तत आप्तिरपाय इमे

---

(१) अरं शीघ्रम् ।
(२) धुरीणो धुरन्धरः ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

क्रमतः कथिता मिहिरप्रमुखैः॥ ५॥

मङ्गलशुक्रबुधा विधुभानू
सौम्यकवी कुजदेवगुरू च॥
भानुजमन्दपुरन्दरवन्द्या(१)
मेषभतः क्रमतः पतयस्ते॥ ६॥

स्वरूपलक्षणं चापि वर्णभेदं सुखासुखम्॥
प्रश्नकर्तुर्वयोमानं लग्नात्सर्वं विचिन्तयेत्॥ ७॥
रत्नकाञ्चनमुक्तानां लाभालाभौ विचक्षणः॥
धातूनां च धनस्थानाच्चिन्तयेत्क्रयविक्रयौ॥ ८॥
पराक्रमं सहोत्थानां सुखं साहसकर्म्मणाम्॥
दासानां च भगिन्यादेस्तृतीयात्परिचिन्तयेत्॥ ९॥
मित्रालयग्रामलाभो वाहनानां सुखं सुखात्॥
मातापित्रोः सुखं क्षेत्रवाटिकादिसुखं तथा॥ १०॥
गर्भापत्यनयानां वै मन्त्रसन्धानयो(२)स्तथा॥
बुद्धिप्रबन्धशास्त्राणां विचारः पञ्चमालयात्॥ ११॥
मातुलानां रिपूणां च महिष्याः क्रूरकर्म्मणाम्॥
रोगातङ्कव्रणादीनां विचारो रिपुभावतः॥ १२॥
परैः समं विवादं च वाणिज्यं व्यसनं तथा॥
गमागमौ कलत्रं च चिन्तयेत्सप्तमालयात्॥ १३॥
रिपुसङ्ग्रामदुष्टानां मार्गस्यापि गदस्य च॥
नद्युत्तारभयानां च छिद्रं छिद्रे विचिन्तयेत्॥ १४॥

---

(१) पुरन्दरैर्देवैर्वन्द्य इति पुरन्दरवन्द्यो गुरुः।

(२) सन्धानं मद्यसन्धानमिति।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

वापीकूपतड़ागानां निर्म्माणं देवताऽऽलयम् ॥
यात्रादीक्षाऽध्वकर्म्माणि चिन्तयेन्नवमालयात् ॥ १५ ॥
पितुः सुखं तथा राज्यं व्यापारं राजकर्म्म च ॥
पुण्यं मुद्रासुखं सर्वं चिन्तयेद्दशमालयात् ॥ १६ ॥
कन्याकाञ्चनरत्नानां वाहनानां च लाभतः ॥
विद्याव्यापारवित्तानां कर्त्तव्या चिन्तना बुधैः ॥ १७ ॥
विवाहत्यागभोगानां दानादिकृषिकर्म्मणाम् ॥
व्ययं व्यये निरोधं च रिपूणां प्रविलोकयेत् ॥ १८ ॥
भावो हि यः स्वपतिना शुभखेचरेण
दृष्टो युतो भवति वा परिवर्द्धते ऽसौ ॥
नष्टेन्दुमङ्गलपतङ्गपतङ्गपुत्रै-
र्नाशं प्रयाति किल मिश्रखगैर्विमिश्रम् ॥ १९ ॥

इति प्रश्नभूषणे प्रथमो ऽध्यायः ।

तुङ्गमित्रादिकं ज्ञात्वा ग्रहाणां शयनादिकम्
बलाबले स्वभावं च प्रश्नकाले फलं वदेत् ॥ २० ॥

अथ कपटप्रश्नलक्षणम् ।

प्रश्नलग्नोपगौ चन्द्रमन्दौ यदा
वासरेशो घटे रश्मिहीनो बुधः ॥
पृच्छकस्त्वागतो दुष्टभावादसौ
प्रश्नमित्थं विचिन्त्यात्र धीरो वदेत् ॥ २१ ॥
प्रश्नलग्नाधिपो लग्नगेहं यदा
कार्यनाथो ऽपि कार्यालयं पश्यति ॥
कार्यमङ्गाधिपः कार्यपोऽङ्गमादा

सर्वथा कार्यसिद्धिर्वर्जनानां वदेत् ॥ २२ ॥
चेन्मिथो वीक्षणं लग्नकार्येशयो-
रात्मभावस्थयोः कार्यसिद्धिस्तदा ॥
पूर्णबिम्बेन चन्द्रेण दृष्टाविमौ
सत्वरं कार्यसिद्धिः प्रयासं विना ॥ २३ ॥
शुभवर्गगते लग्ने सशुभे नरभो(१)दये ॥
शीघ्रं तद्व्यत्ययेनैव मिश्रे कार्यं विलम्बतः ॥ २४ ॥

इति सर्वप्रश्नयोगाः ॥

## अथ मौष्टिकादिप्रश्नः ॥

स्वांशगः खेचरः स्वांशमङ्के यदा
धातुचिन्ता त्रिकोणेऽथवाऽऽलोकयेत् ॥
अन्यभागस्थितो जीवचिन्ता तदा
मूलचिन्ताऽन्यभागं परांशोपगः ॥ २५ ॥
जीवं मूलं धातुमंशक्रमेण
विज्ञायैवं युग्मभे प्रश्नकाले ॥
धातुं मूलं जीवमित्यादि विद्या-
दोजे मुष्टौ ह्यङ्गतं वा विशेषात् ॥ २६ ॥

## अथ पथिकागमनागमनप्रश्नः ॥

प्रश्नतनोः सुखभे दशमे वा
सौम्यखगो गमनं नहि गन्तुः ॥

---

(१) वृषमिथुनसिंहतुलाधनुकुंभा एता एव नरराशयः ।

तत्र गता यदि पापनभोगा(१)
आगमनं न वदन्ति महान्तः ॥ २७ ॥
चतुर्थतो वा दशमाद्द्वितीये ऽभ्येति खेचरः ॥
यावता तावता धीरः पथिकागमनं वदेत् ॥ २८ ॥
प्रश्नकाले यदा केन्द्राद्द्वितीये तारकापतिः ॥
आयाति पथिकस्तत्र विना सप्तमराशिगम् ॥ २९ ॥
सप्तमस्थो यदा चन्द्रः पथिकः पथि वर्त्तते ॥
मार्गाधिपो वा राश्यर्द्धात्परतो यदि संस्थितः ॥ ३० ॥
चराङ्गे चरभागे ऽपि चतुर्थे यदि चन्द्रमाः ॥
आयाति तत्क्षणादेव प्रवासी पथिका ऽपि च ॥ ३१ ॥
जीवो वा भार्गवो वा ऽपि चन्द्रो वा सुखवेश्मनि ॥
पथिकं गृहमायान्तं जानीयात्प्रश्नवित्तदा ॥ ३२ ॥
गुरुशुक्रौ द्वितीये वा तृतीये प्रश्नलग्नतः ॥
तथा गृहागतं विद्यात्पथिकं नात्र संशयः ॥ ३३ ॥
शुक्रज्ञरविमन्दानामेको ऽपि चरराशिगः ॥
प्रवासी शीघ्रमायाति न च वक्रो यदा तदा ॥ ३४ ॥
प्रश्नलग्नाच्च्युतिर्वाच्या वृद्धिस्तु सुखभावतः ॥
प्रवासो दशमस्थानान्निवृत्तिः सप्तमालयात् ॥ ३५ ॥
सत्वरं चरलग्ने तु स्थिरलग्ने न संभवः ॥
द्विःस्वभावे विलम्बेन सदसद्ग्रहयोगतः ॥ ३६ ॥
शशाङ्कलग्नपौ षष्ठे सप्तमे वा युतौ यदि ॥

---

(१) पापनभोगा नभसि आकाशे गच्छन्ति इति नभोगाः ग्रहाः पापाश्च ते नभोगाश्च इति।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

अष्टमेशेन कुद्दतो मरणं पथिकस्य वै ॥ ३७ ॥
पृष्ठोदये यदा लग्ने सौम्यादृष्टे खलेक्षिते ॥
प्रवासो दुःखसन्तप्तः पापैर्वा केन्द्रगैरपि ॥ ३८ ॥
सूर्ये ऽष्टमे कुजे वा ऽपि पथि चौरभयं वदेत् ॥
यावन्तो निधने खेटाश्चौरास्तत्सङ्ख्यकाः स्मृताः ॥ ३९ ॥
सिंहे रविः शशी भौमो निधने शनिनेक्षितः ॥
शस्त्रकोपं वदेत्तत्र यदि लग्ने शुभो नहि ॥ ४० ॥
दशमे शुभसंयुक्ते नवमे वा विशेषतः ॥
अर्थपूर्णः समायाति पथिको नात्र संशयः ॥ ४१ ॥
प्रश्नकाले स्थिरे लग्ने स्यातां नैव गमागमौ ॥
न मृतं न च नष्टं च न रोगो न पराजयः ॥ ४२ ॥
तद्व्यत्ययं चरे लग्ने द्विस्वभावे तु मिश्रता ॥
शुभदृष्ट्या शुभं ज्ञेयं चन्द्राद्वा व्यत्यये ऽन्यथा ॥ ४३ ॥
लग्नाद्यत्प्रमिते खेटस्तेन द्वादश सङ्गुणाः ॥
तैरेव दिवसैर्ज्ञेयं तदागमनमादिभिः ॥ ४४ ॥

## अथ नौकागमनप्रश्नः ।

कल्याणसंयुता नौका न वा कल्याणसंयुता ॥
इति प्रश्ने ऽष्टमस्थानं सर्वतः परिचिन्तयेत् ॥ ४५ ॥
लग्नं लग्नेश्वरः पश्येदष्टमं निधनाधिपः ॥
न विघ्निता तदा नौका वर्त्तते कुशलात्मिका ॥ ४६ ॥
लग्नपो वा ऽष्टमेशश्च सप्तमे यदि वर्त्तते ॥
तदोत्पातं विजानीयादरिवन्हिकृतं तदा ॥ ४७ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

लग्ने ऽष्टमे चतुर्थे वा पापो रविकरे (१)ऽङ्गपः ॥
नौकापतिस्तदा रोगी मृतो वेति बुधो वदेत् ॥ ४८ ॥
लग्नपो नेक्षते लग्नं नाष्टमं निधनाधिपः ॥
नद्यां प्रवृडिता नौका विज्ञेया गणकोत्तमैः ॥ ४९ ॥
लग्नाष्टमपती नीचे गुरुर्नवमगो यदि ॥
रिपुचेत्रे तदा लाभो न नौकाव्यवहारतः ॥ ५० ॥
नौकाप्रश्ने यदा जीवो निधने लग्ननायकः ॥
लग्नं पश्यति चेल्लाभो व्यवहारान्न संशयः ॥ ५१ ॥
अष्टमे सशुभे शुक्रे सबले तनुपे ऽपि च ॥
चन्द्रे ऽपि तादृशे लग्नं सबलं भूरिलाभकृत् ॥ ५२ ॥

इति नौकाप्रश्नः ॥

अथ शत्रुगमनागमननिवृत्तिप्रश्नः ॥

सुखालये ऽलिकुंभमीनकर्कटा भवन्ति चे-
द्रिपोः पराजयस्तदा पलायनं चतुष्पदैः ॥
सुतारिभावगैः खलैर्निवर्त्तते ऽरिवाहिनी
खलैश्चतुर्थभावगैः समेत्यात्परं परः ॥ ५३ ॥
चरोदये शुभः शुभं करोति यायिनामरं
खलैरशोभनं तदा स्थिरे ऽपि वा सुशोभनम् ॥
निशापतिः स्थिरे चरे तनावरेर्न चागम-
स्तदागमो विपर्यये विपर्ययः पुरातनैः ॥ ५४ ॥
हिरात्मभावगे विधौ स्थिरोदये ऽरिवाहिनी
स्वदूरमागता सती निवर्त्तते यदा तदा ॥

---

(१) अस्तं गते ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

द्विदेहभे तनौ शशी चरे ऽपि सा निवर्त्तते
विपर्यये ऽरिवाहिनो द्विधापुरं समेति सा ॥ ५५ ॥
शनीज्यवीक्षिते यदा स्थिरोदये न पृच्छतो
गमागमौ तदा वदेत्त्रिपञ्चषष्ठगाः खलाः ॥
भवन्ति शत्रुसङ्गमापवाहनोपगा यदा
निवर्त्तनाय सूरिभिः पुरातनैरितीरितम् ॥ ५६ ॥
चन्द्रादित्यौ चतुर्थस्थौ नायाति रिपुवाहिनी ॥
शुक्रज्ञगुरवो बन्धावरमायाति पृच्छतः ॥ ५७ ॥
चलितो न रिपुर्ज्जीवो मन्दो वा ऽपि स्थिरोदये ॥
चरोदये चेदादित्यो जीवो वा याति सत्वरम् ॥ ५८ ॥

इति शत्रुगमनागमननिवृत्तिप्रश्नः ॥

## अथ विवाहप्रश्नः ॥

त्रिसप्तमायपञ्चमारिभावगो निशाकरो
रविज्ञजीववीक्षितो विवाहकारको भवेत् ॥
त्रिकोणकेन्द्रगा गुरुज्ञशुक्रशीतभानवो
यदीह लग्नतो भवन्ति वा विवाहकारकाः ॥ ५९ ॥
प्रश्नलग्नेशजायाधिपौ खत्तऽगा-
वुच्चभावस्थितौ चेन्मिथो वीक्षितौ ॥
लग्नपः सप्तमे सप्तमेशो यदा
लग्नगः सत्वरं तद्विवाहं वदेत् ॥ ६० ॥

इति विवाहप्रश्नः ॥

## अथ स्त्रीप्रश्नः ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

लग्नजायाधिपौ खस्थौ यदि वा व्यत्ययेन तौ ॥
दिने दिनेऽधिका प्रीतिर्दम्पत्योर्जायते मिथः ॥ ६१ ॥
नरो लग्नपतिः कामे जायाज्ञाप्रतिपालकः ॥
नारी जायाऽधिपे लग्ने पत्याज्ञाकारिणी भवेत् ॥ ६२ ॥
लग्नजायेशयोर्दृष्टिर्लग्ने वा सप्तमे तयोः ॥
परस्परं तदा प्रीतिः पीयूषसदृशी भवेत् ॥ ६३ ॥
प्रश्नलग्नपतिः स्वोच्चे गुणैरुच्चो भवेत्पतिः ।
जायास्वामी यदोच्चस्थो नारी स्वामिगुणाधिका ॥ ६४ ॥
सप्तमे सुखभे क्रूरा भार्गवो यदि दुर्बलः ॥
न जीवति तदा नारी राज्ञर्वा कामिनीगृहे ॥ ६५ ॥
चतुर्थं सप्तमं चैव पञ्चमं सौम्यवीक्षितम् ॥
विवाहिता धृता चापि द्वे भार्ये भवतस्तदा ॥ ६६ ॥
सप्तमे खलसंयुक्ते चतुर्थे शुभसंयुते ॥
म्रियते प्रथमा नारी धृता च परितिष्ठति ॥ ६७ ॥
पापग्रहाः स्थिरे राशौ स्वपतिः पुत्रसंभवः ॥
शुभाशुभाः स्थिरे लग्ने मिश्रितः पुत्रसंभवः ॥ ६८ ॥
कुजो मन्दः सुतस्थानं प्रपश्यति यदा तदा ॥
चन्द्रदृष्टिं विना तत्र जारजातः सुतो यतः ॥ ६९ ॥
चन्द्रादित्यौ खला कान्तावङ्गं जीवो न पश्यति ॥
कलाहीनो यदा चन्द्रस्तदा गर्भः परोद्भवः ॥ ७० ॥

इति स्त्रीप्रश्नः ॥

अथ गर्भप्रश्नः ॥

गर्भस्य कुशलप्रश्ने पञ्चमे पापखेचरः ॥



Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

स्वस्वामिदृष्टिरहिते तदा गर्भच्युतिर्भवेत् ॥ ७१ ॥
पञ्चमे शुभसंयुक्ते स्वामिना वा युतेक्षिते ॥
गर्भस्य कुशलं ज्ञेयं मा(१)सपे सबले बुधैः ॥ ७२ ॥

इति गर्भप्रश्नः ॥

अथ प्रसवकालज्ञानम् ॥

लग्नेशभुक्तभोग्यांशैर्भुक्ता भोग्याः क्रमाद्बुधैः ॥
मासा निरूपितास्तस्य गर्भस्य कलया दिनम् ॥ ७३ ॥
यतमे लग्नतः शुक्रः स्थाने तावन्त एव हि ॥
गर्भस्य मासा विज्ञेया गता भोग्याश्च सूरिभिः ॥ ७४ ॥
भौजर्क्षे विषमांशे वा पुत्रजन्मकरः शनिः ॥
समांशे समभे पुत्रीकारको नात्र संशयः ॥ ७५ ॥
सूर्यः सोमो गुरुश्चैव विषमे पुत्रकारकः ॥
शुक्रमङ्गलचन्द्राणां यदि दृष्टिः सुते सुतः ॥ ७६ ॥
शुक्रचन्द्रौ पञ्चमस्थौ कन्याजन्मकराविमौ ॥
पश्यतस्तौ सुतस्थानं पुत्रदौ बलिनौ यदि ॥ ७७ ॥
नीचास्तारिगतौ तौ चेत्सन्तानं न वदेद्बुधः ॥
लाभगौ बलिनावेतौ पुत्रदौ प्रश्नलग्नतः ॥ ७८ ॥
सन्तानभवनाधीशः प्रश्नलग्नाधिपस्तथा ॥
द्वावेव नरराशिस्थौ पुत्रः स्त्रीराशिगौ सुता ॥ ७९ ॥
वहमाना यदा नाडी दक्षिणा पुत्रसंभवा ॥

---

(१) सितकुजेज्यरवीन्दुसौरिचन्द्रात्मजास्तनुपचन्द्रदिवाकरा एते मासेश्वराः ।

वामनाडी तदा पुत्री वह्नमाना विशेषतः ॥ ८० ॥
लग्ने यदि सुताधीशः पञ्चमे सुतनायकः ॥
बलिना शशिना युक्तस्तदा पुत्रो न संशयः ॥ ८१ ॥
पञ्चमे यदि पापानां संयोगो वा विलोकनम् ॥
तद्दोत्पातं विजानीयाद्गुरुदृष्टिं विना बुधः ॥ ८२ ॥
प्रश्नकाले ऽङ्गपुत्रेशौ निजोच्चे भवतो यदि ॥
तयोः परस्परंदृष्टिस्तदा पुत्रं विनिर्दिशेत् ॥ ८३ ॥
अस्तांशे पञ्चमाधीशे नीचे वा खलपीड़िते ॥
पुत्रो न जायते तस्य भवत्यपि विनश्यति ॥ ८४ ॥
पञ्चमेशो यदा युक्तो राहुणा वा कुजेन वा ॥
तदा सन्तानहानिः स्यादित्युक्तं पूर्वसूरिभिः ॥ ८५ ॥

इति प्रसवकालज्ञानम् ॥

## अथ रोगिणो मरणप्रश्नः ॥

प्रश्नलग्नोपगं पापभं रोगिणः
पापयुक्तेक्षितं चाष्टमर्क्षं यदा ॥
पापयोरन्तरे पापयुक्तो ऽष्टमे
चन्द्रमा मृत्युयोगो भवेत्सत्वरम् ॥ ८६ ॥
प्रश्नलग्नस्थिते पापखेटा व्यये
नैधने चन्द्रमा वा नगे लग्नभे ॥
नैधने शत्रुभे सत्वरं रोगिणो
मृत्युयोगस्तदा व्यत्यये व्यत्ययः ॥ ८७ ॥
चन्द्रे लग्ने कलत्रे ऽर्के शीघ्रं रोगो विनश्यति ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

कौर्प्यंशे मेषभे भौमे चन्द्रयुक्ते च नश्यति ॥ ८८ ॥
प्रश्नलग्नाद्यदा सप्तमे सद्युते
रोगिणो भद्रमुक्तं न पापग्रहैः ॥
मिश्रखेटैर्विमिश्रं फलं सूरिभि-
स्तत्र लग्नेश्वरे पापयुक्ते मृतिः ॥ ८९ ॥
रक्तपित्तप्रकोपो दिनेशोऽष्टमे
भूसुतो वा बुधः सन्निपातस्तदा ॥
कुष्ठरोगोऽष्टमे राहुयुक्तो रविः
षष्ठगो वा महाकुष्ठरोगप्रदः ॥ ९० ॥
अष्टमे राहुणा संयुतः सूर्यजो
वातरोगेण पादादिकम्पस्तदा ॥
सन्निपातः कविश्चन्द्रयुक्तोऽष्टमे
वीर्यहीनः सपापो महारोगकृत् ॥ ९१ ॥
लग्नपो दुर्बलो मृत्युनाथो बली
शत्रुभे नैधने शीतभानौ मृतिः ॥
लग्नपश्चोदितो मृत्युपो दुर्बलो
लाभपो वीर्ययुक्तश्चिरं जीवनम् ॥ ९२ ॥
सुखागारं रोगी दशमभवनं त्वौषधगृहं
रुगस्तं वैद्योऽङ्गं सकलमिति विज्ञाय गणकः ॥
बलाक्रान्तौ वैद्यौषधगृहपती प्रश्नसमये
तदा भद्रं विद्यादिह हि तदभावेन कुशलम् ॥ ९३ ॥
अष्टमे वा तनुस्थाने राहौ कृत्या भवो गदः ॥
भूतामयो वा मन्देन युते केतावपि ध्रुवम् ॥ ९४ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

इति रोगिणो मरणप्रश्नः ॥

अथ नष्टद्रव्यप्रश्नः ।

स्थिरलग्ने तदंशे वा निजवर्गोत्तमे ऽपि वा ॥
निजेन चोरितं वित्तं यदा तत्रैव संस्थितम् ॥ ९५ ॥
पूर्वे मध्ये ऽन्तिमे ऽङ्गस्य दृकाणे क्रमतो बुधैः ॥
द्वारान्तिके तथा मध्ये गृहान्ते तद्धनं वदेत् ॥ ९६ ॥
पूर्णेन्दुरङ्गगो युक्तो दृष्टो वा शुभखेचरैः ॥
शीर्षोदये वा नष्टाप्तिं कुरुते लाभगो ऽपि सन् ॥ ९७ ॥
पूर्णबिम्बः शशी लग्नगो वीक्षितो
देवपूज्येन शुक्रेण वा पृच्छतः ॥
नष्टवित्तस्य लाभं च लाभालये
सौम्यखेटो बली सत्वरं यच्छति ॥ ९८ ॥
वक्तव्या नष्टवित्ताशा केन्द्रोपगतखेचरैः ॥
अभावे प्रश्नलग्नर्क्षाद्विच्युतांशैस्तु योजनम् ॥ ९९ ॥

इति नष्टद्रव्यप्रश्नः ॥

अथ वादिप्रतिवादिनोर्जयाजयप्रश्नः

वादिनो विजयप्रश्ने लग्ने क्रूरे तदा जयः ॥
यदि स्यात्सप्तमे क्रूरे विजयः प्रतिवादिनः ॥ १०० ॥
लग्ने च सप्तमे क्रूरावनयोर्बलिनो जयः ॥
यदा द्वौ बलिनौ स्यातां सन्धिर्वा विग्रहो महान् ॥ १०१ ॥
अथ वा यत्र कुत्र स्थौ पापौ पूर्णदृशा मिथः ॥
पश्यतो ऽस्त्रप्रहारेण वादिनोर्मरणं भवेत् ॥ १०२ ॥
शत्रोरुपद्रवे कष्टे विवादे वा रणाजिरे ॥

लग्ने पापे जयो ऽवश्यं पापदृष्ट्या पराजयः ॥ १०३ ॥

इति वादिप्रतिवादिनोर्जयाजयप्रश्नः ॥

अथ दिनचर्याप्रश्नः ॥

लग्नगो दिनचर्यायां सप्तमस्थो ऽपि चन्द्रमाः ॥
कुरुते शोभनं सर्वं विपरीतमतो ऽन्यथा ॥ १ ॥
क्रूरो राहुः कुजो वा ऽपि निजक्षेत्रे ऽष्टमे भवेत् ॥
चन्द्रो ऽपि यदि तत्रस्थः कुरुते शस्त्रजं भयम् ॥ २ ॥

अथ प्रकारान्तरेण ॥

तिथ्यर्क्षवारयोगानां संख्या करणसंयुता ॥
नवाप्ता प्रश्नकाले ऽर्कादियं दिनदशा नृणाम् ॥ ३ ॥
रविस्तु शोकसन्तापाविन्दुः क्षेमं धरासुतः ॥
अपमृत्युं बुधो बुद्धिं जीवो लाभं कविः शुभम् ॥ ४ ॥
शनिः शत्रुभयं कष्टं राहुः केतुश्च शोकताम् ॥
वितनोति नरादीनामित्याहुः पूर्वसूरयः ॥ ५ ॥

अथ क्रयविक्रयप्रश्नः ॥

प्रश्नलग्नपतिः क्रेता विक्रेता लाभपो ग्रहः ॥
क्रयाद्यदि भवेल्लाभो गृह्णामीदमवन्तदा ॥ ६ ॥
इति प्रश्ने शुभं लग्नं प्रष्टुर्लाभः क्रयाणकात् ॥
विक्रीणामीति संप्रश्ने लाभस्थानं विचारयेत् ॥ ७ ॥
शुभं स्वामियुते लाभे विक्रयाल्लाभमादिशेत् ॥
लाभेशे शुभवर्गाढ्ये मित्रक्षेत्रादिगे ऽपि च ॥ ८ ॥
समर्घं वा महर्घं स्यादिति प्रश्ने विशेषतः ॥
लग्नस्य सौम्यतां ज्ञात्वा फलं कुर्याद्विचक्षणः ॥ ९ ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

ग्रहो ऽसौ यावतो मासान्विघत्ते ऽङ्गस्य सौम्यताम् ॥
समर्घं तावतो मासा नान्यथा व्यत्ययं वदेत् ॥ १० ॥
विबले लग्नपे प्रश्ने वस्तुस्वामिबलेन तु ॥
विज्ञेयमत्र लग्नस्य बलान्तदनुसारतः ॥ ११ ॥
माषकोद्रवकङ्कूनां लवणस्य तिलस्य च ॥
द्रव्याणां कृष्णवर्णानामधिपो रविजो भवेत् ॥ १२ ॥
यवगोधूमशालीनां सर्षपस्य च देवता ॥
स्वर्णस्य पीतधान्यानां गुरुरेव भवेदिह ॥ १३ ॥
भृगुः स्यात्सर्वसस्यानां विद्रुलानां बुधो भवेत् ॥
गन्धादीनां रसानां च स्नेहानामधिपो रविः ॥ १४ ॥
सर्वस्य कोषधान्यस्य प्रवालस्य च मङ्गलः ॥
रसानामधिपश्चन्द्रः सस्यानामधिपो गुरुः ॥ १५ ॥
आधाता भार्गवो नूनं विधाता सकलस्य च ॥
सबले प्रश्नलग्ने तु समर्घं विबले न हि ॥ १६ ॥
लाभलाभांशपौ प्रश्ने सबलौ चेन्महर्घता ॥
तावेव बलहीनौ चेत्समर्घं जायते तदा ॥ १७ ॥

इति क्रयविक्रयप्रश्नः ॥

अथ द्रेष्काणप्रश्नः ॥

द्वाविंशतिदृक्काणस्थः प्रश्नलग्नेश्वरो यदि ॥
तदा मृत्युं विजानीयादवश्यं रोगिणो बुधः ॥ १८ ॥
लग्नाष्टमपती लग्ने स्थितावेकत्र रोगिणाम् ॥
दृक्काणे मरणं न स्यादित्युक्तं पूर्वसूरिभिः ॥ १९ ॥
तावेव निधने स्यातामेकद्रेष्काणगौ यदि ॥

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

तदा मृत्युर्भवेदेव रोगिणो नात्र संशयः ॥ २० ॥
लग्नलाभाधिपावेकद्रकाणे लाभगौ यदि ॥
प्रश्नकर्त्तुस्तदालाभो भविष्यति न संशयः ॥ २१ ॥
एवं लग्नेशपुत्रेशावेकद्रेष्काणसंस्थितौ ॥
पञ्चमे पुत्रलाभः स्यादनायासेन पृच्छतः ॥ २२ ॥
एवं सर्वेषु भावेषु द्रकाणैरेव केवलैः ॥
तत्तद्भावफलं प्रष्टुर्वक्तव्यं गणकोत्तमैः ॥ २३ ॥
कुलदेशानुसारेण तथा कालानुसारतः ॥
फलं बुद्ध्या ऽनुसन्धेयं स्वमानं रक्षता विदा ॥ २४ ॥
ज्ञात्वा ताजकदर्पणं प्रथमतः श्रीजीवनाथः कृती
रम्यं भावकुतूहलं च परतः पाराशरीवासनाम् ॥
विद्वच्चक्रमनोविनोदकरणं छात्रानुकम्पावशा-
दन्यत्प्रश्नविभूषणं मुनिमतं ज्ञात्वा परं निर्ममे ॥ २५ ॥

इति श्रीजीवनाथकृते प्रश्नभूषणे द्रेष्काणप्रश्नाधिकारः समाप्तः ॥

---

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

प्राचीनतन्त्रतरणेः परिभाव्य

सिद्धान्तसागरतरङ्गसुभङ्गसङ्गः ।

दीर्घप्रयासरचितां प्रवरेष्टदृष्ट्यै

रीतिं तनोति तनवे शशिपालनामा ॥

अथ कतिचित् प्रश्नोत्तरोपयोगिवस्तून्याह ॥

इन्द्वब्ध्यब्ध्यूनशाकस्त्रिगुण-

इह खखद्व्याप्तएवं चलांशा-

स्तद्युक्तार्कस्य दोर्ज्या जिनज-

गुणगुणा त्रिज्यकाप्ताऽऽप्तचापम् ।

तच्छायाऽक्षांशभाग्नी त्रिभगुण-

विहृता लब्धचापं त्रिभक्तं

चीनं याम्ये ऽथ सौम्ये धनमिह

खगुणेषु द्युमानं स्फुटं वै ॥ १ ॥

अत्रोदाहरणम् ॥

यथाऽत्र कल्पितेष्टशकः १८११ अयमेकाब्धिवेदै ४४२१ र्हीनिः १३९० त्रिभिर्गुणितः ४१७० खखयमै २०० र्भक्तः फलं २० । ५१ । ० चायनांशाः । अथ क्रान्त्यर्थमुदाहरणम् । यथा रविः ८ । ९ । २० । ५४ अयनांशाः २० । ५१ । ० । अनयोर्योगः ९ । ० । ११ । ५४ अस्य(१) भुजः २ । २९ । ४८ । ६ । अस्यांशाः ८९ । ४८ । ६ ।

अथैषां ज्या जिनज्यागुणा त्रिज्याभक्ता फलस्य चापं गोल-

(१) भुजास्त्रिभाल्प एवोक्तस्त्र्यधिकः षड्भपातितः । षड्भाधिकः षड्भहीनश्चक्राच्छोध्योऽङ्कभाधिकः ॥ १ ॥

**यथाद्याम्या सौम्या वा क्रान्तिरवगन्तव्या ॥**

तद्यथा । तद्यथा ।

ला(१) (ज्याभु) =९. ९९९९९७४ ज्याभु= ३४३७ । ५३ । ४६

ला(ज्याजि) =९. ६०९३१३३ ज्याजि= १३९८ । २१ । ३८

अनयोर्घातः =१९.६०९३१०७ घातः=४८०७४१८ । १८ । ५७

ला(ज्याक्रा) =९. ६०९३१०७ ज्याक्रा= १३९८ । १९ । ७

अस्याश्चापं द.क्रा=२३° । ५९' । ५९'' अस्याश्चापं द.क्रा.=२३° । ५९' । ३३''

**अथ मानेचोकपुरे वेधोपलब्धाः पलांशा २६ । ७ । ४० । एषां स्पर्शरेखा क्रान्तिस्पर्शरेखया हता त्रिज्यया भक्ता फलस्य चापं चरखण्डांशा भवन्ति ।**

तद्यथा । तद्यथा ।

ला(स्पअ) = ९. ६९०६३५७ स्पअ= १६८६ । २३ । ५४

ला(स्पक्रा) = ९. ६४८५७७५ स्पक्रा= १५३० । ३९ । २५

अनयोर्घातः = १९. ३३९२१३२ घातः=२५८१२९७ । १९ । १२

ला(ज्याच) = ९. ३३९२१३२ ज्याच= ७५० । ४८ । ४९

अस्याश्चापं चरखण्डांशाः=१२° । ३६' । ५०'' अस्याश्चापं चरखण्डांशाः= १२ । ३६ । ५३

अथा ऽऽस्यां जातं दिनस्य द्विविधमानम्=२५ । ४७ । ४४ ॥ २५ । ४७ । ४३

## अथ वराहमिहिरोक्तेष्टकालानयनम् ॥

**दिनं खरामैरधिकं यदल्पं**
**रसेन पंत्या निहतं शराप्तम् ॥**
**हीनं धनं देशपलप्रभायां**
**छाया च सा स्याद्दिनमध्यभागे ॥ २ ॥**

---

(१) लघुरिक्थेन गणितं प्रदर्शितम् ।

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

छाया निजेष्टा दिनमध्यभाग-
च्छायोनिता दिक्समन्विता तया॥
दिने शरघ्ने गतगम्यनाड़ी
श्रीमानवराद्यो वदतीष्ट युक्तया ॥ ३ ॥

अनयोर्व्याख्या । दिनं दिनमानं खरामैस्त्रिंशद्भिरधिकं अन्तरं न्यूनं च यद्भवति । तत् रसैन षड्भिः । पंक्त्या दशभिर्निघ्नतं निघ्नं कार्यम् । अत्र शराप्तं शरेण पञ्चभिराप्तं प्राप्तं फलं देशपलप्रभायां । पलसम्बन्धिनी अक्षांशसम्बन्धिनी या प्रभा छाया इति पलप्रभा । देशीया स्वदेशीया या पलप्रभा इति देशपलप्रभा तस्यां हीनं धनं कार्यम् । दिनमध्यभागे दिनस्य मध्यभाग इति दिनमध्यभागस्तस्मिन्या छाया भवति ॥ छायेति । निजेष्टा निजा स्वकीया इष्टा इष्टकालजा इति निजेष्टाच्छाया दिनमध्यभागच्छायोनिता दिनमध्यभागस्य या छाया इति दिनमध्यभागच्छाया तया ऊनिता हीना कार्या । अस्यां दिक्समन्विता दिग्भिर्दशभिः समन्विता आढ्या कार्या । अनया शरघ्ने शरेण पञ्चभिर्गुणिते दिने दिनमाने भक्ते फलं गतगम्यनाड़ी ज्ञेया गतस्य गम्यस्य इति गतगम्यौ गतगम्ययोर्या नाडी घटिका इति । अर्थात् यदा प्राक्कपाले रविस्तदा गता नाडी यदाऽपरकपाले रविस्तदा गम्या एष्या नाडी चावगन्तव्येति ॥

अत्रोद्देशकः ॥

यथा संवत् १९४६ पौषशुक्लप्रतिपच्चन्द्रे मानेचौकपुरे प्रश्नसमये जलसमीकृतायां भूमौ स्थापितस्यार्कमिताङ्गुलस्य

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

नुः किन्त्वार्कमिताङ्गुला भास्वावगता । अथ ताभ्यः प्रश्नसमय-मानज्ञानाय धूलीकर्मोच्यते । अत्र प्राग्वत्साधितं दिनमानं २७ । ५३ । ५१ अस्य खगुणेभ्योऽल्पत्वात्तदन्तरं २ । ६ । ९ पंक्त्या १० निघ्नं २१ । १ । ३० पञ्चघ्नं ४ । १२ । १८ फल-मिदं मानेचैकपुरस्य पलभायामस्यां ५ । ५३ । ८ घनं १० । ५ । २६ कार्यं । तदा जातेयं तन्नगरीया मध्याह्नच्छाया । अथे-ष्टा १२ च्छाया मध्याह्नच्छायया ऽनयो १० । ५ । २६ ना १ । ५४ । ३४ दिग्भिः १० सहिता ११ । ५४ । ३४ । अनया दिन-माने २७ । ५३ । ५१ शरपक्षे १३९ । २९ । १५ भक्ते लब्धा ११ । ४२ । ४४ स्वेते भानोः प्राक्कपाले स्थितत्वात् प्रश्नसमये तस्य गताः समया इति वेदितव्येत्यलं पल्लवितेन ॥

अथ कस्यचित्पद्यं ॥

पादभाभो रसाढ्य भिर्योमनेत्रभुवोद्धृताः ॥

लब्धाङ्कैर्घटिका ज्ञेया शेषाङ्कैश्च पलाः स्मृताः ॥ ४ ॥

रामाङ्गुलनरच्छाया त्रिभिर्युक्तास्तथा ऽनया ॥

चतुष्षष्टिर्हृता नाड्यो लब्धाङ्कैः शेषकैः पलाः ॥ ५ ॥

अथ लग्नानयनस्योदाहरणम् ॥

यथा रविः ८ । ९ । २० । ५४ अयनांशाः २० । ५१ । ० सायनरवेर्भोग्यांशौ २९ । ४८ । ६ स्वदुदयो ३०३ गुणितस्त्रिं-शता भक्तो भोग्यकालः ३०० । ५९ । ४८ । अयमिष्टघटी ११ । ४२ । ४४ पलेभ्यः ७०२ । ४४ शोधितः ४०१ । ४४ । १२ अ-स्माद्गम्योदयः कुंभोदयः शुद्धः शेषं १५० । ४४ । १२ त्रिंशता गुणितमशुद्धेन मीनोदयेन २१८ भक्तं लवाद्यं २० । ४४ । ६७ शु-

द्वस्य कुंभस्य मेषादिगणनया राशिसंख्याभिः११र्युतं ११।२०।४४।३७ अयनांशैर्हीनं जातं लग्नम् १०।२९।५३।३७। अत्र षट्पलभायां स्वदेशोदया लिख्यन्ते ॥

मे = २१८ । वृ = २५१ । मि = ३०३ ।
क = ३४३ । सिं=३४७ । क=३३८ ॥

## अथ दशमलग्नसाधनम् ॥

यथा पूर्वसाधितं लग्नभुक्तपलं १५०।४४।१२ मेषादिघटपर्यन्तं शुद्धोदयानां योगेना ३३८२ नेन युक्तं जातं लग्नस्योदयपलं ३५३२।४२।१२ अत्र मकरादेर्वृश्चिकपर्यन्तं लङ्कोदयानां योगेना ३२७७ नेन शुद्धं शेषं २५५।४४।१२ खत्रिघ्नं चाशुद्धेन धनुलङ्कोदयेनो ३२३ द्धृतं लवाद्यं २३।४५।९ शुद्धस्य धनुराशेः संख्यया ८ युतं ८।२३।४५।९ अयनांशै २०।५१ र्हीनं जातं दशमलग्नं ८।२।५४।९।

अथैतन्नतादपि साध्यते। यथा सायनरविः ९।०।११।५४ अत्र चरखण्डेभ्य एभ्यो-६०।४८।२० ऽनुपातेन साधितं चरपलं १२७।५२ ततो दिनदलं १२।५२।८ अस्येष्टघटिकाया ११।४२।४४ श्चान्तरं जातं पूर्वनतं १।९।२४ अत्र लङ्कोदयेन रवेर्भुक्तपलं २।८।७ एतन्नतपलेभ्यः ६९।२४ शोधितं जातं दशमलग्नस्य भोग्यपलं ६७।१५।५३ एतच्च तदुदयपलेभ्यः ३२३ शोधितं जातं पूर्वतुल्यमेव दशमलग्नस्य भुक्तपलं २५५।४४।६ अस्माल्लग्नं तदेव ८।२।५४।९

अथ चैतल्लग्नादपि साध्यते यथा पूर्वसाधितं सायनलग्नम् ११।२०।४४।३७ अत्र चरखण्डाभ्यः साधितं लग्नचरपलं

Shree Sudharmaswami Gyanbhandar-Umara, Surat www.umaragyanbhandar.com

८१ । ३० । ४६ लग्नराशिदलं १५ । १८ । ३० । ४६ इदं सप्तमलग्ने-
द्विनार्द्धतुल्यम् । अतः षष्ठभलग्नस्य भोग्यांशैस्तदुदयो गुणित-
स्त्रिंशता भक्तो जातो भोग्यकालः ८५ । ४६ । ३४ अयं लग्न-
राशिदलपलेभ्यः ९१८ । ३० । ४६ शोधितः ८३२ । ४४ । १२ अत्र-
तुलावृश्चिकयोश्चोदयमाने शोधिते शेषं पूर्वसाधितदशमास्य-
लग्नभोग्यपलतुल्यमेव २५५ । ४४ । १२ अस्मात्सिद्धं तदेव
लग्नम् ८ । २ । ५४ । ९

अत्र लङ्कोदयाः मे.=२७८=मी. । वृ.=२९९=कुं. मि.=
३२३=क. ।

अथ रात्राविष्टकालज्ञानार्थं कस्यचित्पद्यम् ॥

तरणेर्व्योममध्यस्था ऋक्षसंख्या नगोनिता ॥
नखघ्ना नव भिर्भक्ता गता रात्रिः स्फुटा भवेत् ॥ ६ ॥

साम्बत्सरप्रवरचण्डसुचण्डतेजाः
पश्यन्तु मत्कृतनयं विनयान्वितोऽहम् ।
इत्यर्थये चतुरचारुसुचित्तवृत्ति
प्रोल्लासकारकमहो सफलः श्रमो मे ॥

इति शुभम् ॥